संस्कृतवार्ताः

22/07/2025

सायम्  - 06:20

<u>मुख्यवार्ता:</u>

- विपक्षिदलानां सिंदूराभियानं, बिहारे विशिष्ट-गहन-संशोधनं, चेत्यादिषु अन्यप्रकरणेषु चर्चायाः अभ्यर्थनायाः अनन्तरं द्वयोरेव सदनयोः कार्याचरणं स्थगितम् ।
- महाराष्ट्रसर्वकारेण अद्य बम्बई उच्चन्यायालयेन द्विसहस्रषट्तमवर्षस्य सप्त/एकादश रेलविस्फोटप्रकरणे सर्वेषां द्वादश अभियुक्तानां निर्दोषीकरण-निर्णयं विरुध्य सर्वोच्चन्यायालये  प्रस्तावः कृतः।
- अमेरिकादेशात् अपाचे हेलिकॉप्टर् इति वायुयानानां प्रथमः समूहः भारतम् प्राप्तः।
- बांग्लादेशे जातायां विमान-दुर्घटनायां मृतकानां संख्या समेध्य एकत्रिंशत् सञ्जाता अस्ति ।
- जार्जियानगरे फ़ाइड् महिलाविश्वचषकशतरञ्जप्रतियोगितायाः उपान्त्यचक्रे दिव्या देशमुख कोनेरुहम्पी च अद्य चीनदेशस्य प्रतिद्वन्द्विक्रीडिकयोः विरुद्धं क्रीडिष्यतः ।

<u>लोकसभाराज्यसभा-स्थगनम्</u>

विपक्षिदलानां विरोध-प्रदर्शनस्य कारणेन सोमवासरे लोकसभायाः राज्यसभायाः च सदनयोः प्रवर्तमाने कार्याचरणे समुद्भूतायाः बाधायाः अनन्तरं कार्याचरणं सम्पूर्ण-दिवसाय स्थगितम् जातम् । विपक्षिदलैः सिंदूराभियानं, बिहारे विशिष्ट-गहन-संशोधनं, चेत्यादिषु अन्यप्रकरणेषु चर्चायाः अभ्यर्थना कृता अस्ति । यदा लोकसभायाः द्वितीय-स्थगनस्य अनन्तरम् अपराह्णे द्विवादने पुनरुपवेशनं समारभत, तदा विपक्षिसदस्यैः पुनः उच्चनिर्घोषः समारब्धः । संसदीय-प्रकरण-मंत्रिणा किरेन-रिजिजू इत्यनेन विपक्षि-दलानाम् आलोचना कुर्वता प्रोक्तं यत् सर्वकारः चर्चायै सज्जः अस्ति परञ्च विपक्षिदलानि चर्चां विहाय व्यवधानम् अचिन्वन् । एतादृशानां दृश्याणाम् अनन्तरम् एव राज्यसभायां कार्याचरणस्य स्थगनम् सञ्जातम् ।

<u>सर्वोच्चन्यायलये महाराष्ट्रसर्वकारः</u>

महाराष्ट्रसर्वकारेण अद्य बॉम्बे-उच्चन्यायालयेन द्विसहस्रषट्तमवर्षस्य सप्त/एकादश रेलविस्फोटप्रकरणे सर्वेषां द्वादश अभियुक्तानां निर्दोषीकरण-निर्णयं विरुध्य सर्वोच्चन्यायालये प्रस्तावः कृतः।उच्चन्यायालयेन परश्वः प्रकरणमिदं सूचीबद्धं करिष्यते एतदर्थं सहमतिः कृता अस्ति।

द्विसहस्रषट्तमे वर्षे जुलै-मासस्य एकादशे दिनाङ्के घटितेषु विस्फोटेषु मुम्बई-नगरस्य उपनगरीय-रेल-जालपुटे अशीत्युत्तरैकशततः अधिकाः जनाः मृताः, अनेके च व्रणिताः सञ्जाताः आसन् । बॉम्बे-उच्चन्यायालयेन ह्यः एव विशेषन्यायालयस्य दोषित्वनिर्णयः परिवर्तितः आसीत् यतो हि अभियोजनपक्षः आरोपं सिद्धं कर्तुं असफलः अभवत् इति। न्यायाधीशैः अवलोकितं यत् प्रयुक्तानां विस्फोटकानां प्रकारः अपि न संस्थापितः, प्रस्तुतानि प्रमाणानि दोषारोपणाय पर्याप्तानि न आसन् ।

**प्रधानमन्त्री-धनखड़ः**

स्वास्थ्य-कारणानि अधिकृत्य ह्यः उपराष्ट्रपति-पदात् त्यागपत्रप्रदानानन्तरं जगदीप-धनखड़ाय कुशल-स्वास्थ्यस्य प्रधानमन्त्रिणा नरेन्द्रमोदिना कामना कृता अस्ति । सार्वजनिक-संदेशपटल-माध्यमेन श्रीमोदिना प्रोक्तं यत् भारतस्य उपराष्ट्रपतिपदमलङ्कुर्वता श्रीधनखड़वर्येण विभिन्नक्षेत्रेषु देशसेवायाः अवसराः समवाप्ताः । अद्य अपराह्ले द्वादशवादने प्रश्नकालाय समाहूतस्य उपेशनस्य अनन्तरमेव राज्यसभायाः अध्यक्षत्वेन घनश्यामतिवारी इत्यनेन धनखड़वर्यस्य त्यागपत्रमधिकृत्य गृहमन्त्रालयस्य अधिसूचनायाः विषये सदनं संसूचितम् ।प्रातः सदनस्य कार्याचरणावधौ, उपसभापतिना हरिवंशवर्येण इदमपि प्रोक्तं यत् भारतस्य उपराष्ट्रपतेः कार्यालये रिक्ति-सम्बद्धाः संवैधानिकप्रक्रियाः सूचनाप्राप्त्यानन्तरं संसूचयिष्यन्ते । अवधेयं यत् जगदीप-धनखड़-वर्येण स्वास्थ्य-कारणानि अधिकृत्य ह्यः राष्ट्रपतिपदात् त्यागपत्रं प्रदत्तम् ।

**अपाचे**

भारतीयसेनायाः शक्तौ अभिवृद्धिक्षेत्रे अद्य एकः नवीनः अध्यायः युक्तोभवत् । अमेरिकादेशात् अपाचे हेलिकॉप्टर् इति वायुयानानां प्रथमः समूहः भारतम् प्राप्तः। एतानि अत्याधुनिक-हेलिकॉप्टर्-वायुयानानि,प्रायः वायौ वातकोषाः कथ्यन्ते यतो हि एतेषां उन्नत-युद्ध-क्षमता अभियांत्रिकी च उच्चस्तरीया वर्तते । उन्नतशस्त्रैः, संवेदकैः, सर्वविधवतावरणे सञ्चालनक्षमताभिः च सुसज्जितमिदं यानम् । येन भारतीयसेनायाः विमानयुद्धशक्तिः इतोपि वर्धते। भारतीयवायुसेनया अमेरिकीयसर्वकारेण बोइङ्ग् इत्यनेन सह च द्विसहस्रपञ्चदशतमे वर्षे कृतक्रयसहमत्यनुसारं द्वाविंशतिः एतानि अपाचेहेलीकाप्टर्यानानि क्रीतानि ।

**बांग्लादेशः-विमानदुर्घटना**

बांग्लादेशे जातायां विमान-दुर्घटनायां मृतकानां संख्या एकत्रिंशत् , सहैव व्रणितानां संख्या च समेध्य पञ्च-षष्ट्युत्तरैकशतं यावत् सञ्जाता अस्ति । घटनायाम् अस्यां मृतकानां विंशतिसंख्याकाः शवाः तेषां परिवार-सदस्येभ्यः समर्पिताः सन्ति । सैय्यदुर-रहमानः, मुहम्मद-यूनुसः च अद्य प्रातः नेशनल-बर्न-एंड-प्लास्टिक-सर्जरी-इंस्टीट्यूट, ढाका इत्यत्र वार्ताहरेभ्यः एतां सूचनां प्रायच्छताम् ।

**राष्ट्रपतिः**

राष्ट्रपतिपदासीना श्रीमतिः द्रौपदी मुर्मू अद्य उक्तवती यत् राष्ट्राय समाजाय च जीवनसमर्पणं जीवितुं सर्वोत्तमः उपायः अस्ति। राष्ट्रपतिना नवीदिल्लीनगरस्य राष्ट्रपतिभवने उक्तवक्तव्यं द्विसहस्र-अष्टादशतः द्विसहस्र-एकविंशतिवर्षाणां अवधेः कृते द्विपञ्चाशत्तमे राष्ट्रपतिस्काउट्स् एण्ड् गाइड्स् पुरस्कारसमारोहे प्राकाशयत्। कार्यक्रमेस्मिन् राष्ट्रपतिना भारत स्काउट् एण्ड् गाइड्स् इत्यस्य षोडश स्काउट्, गाइड्, रोवर्स तथा च रेन्जर्स् इत्येतेभ्यः तेषाम् अनुशासनाय समाजसेवायै च पुरस्काराः प्रमाणपत्राणि च प्रदत्तानि । सभां सम्बोधयती श्रीमतिः मुर्मूः अवदत् यत् भारतस्काउट् एण्ड् गाइड् इत्यादयः संस्थाः यूनां मध्ये नैतिकमूल्यैः सह निस्वार्थसेवायाः देशभक्तेः च आदर्शान् संस्थापयन्ति।

## एफ़ ३५ युद्धविमानम्

तिरुवनन्तपुरम्-विमानस्थानके जूनमासस्य चतुर्दश दिनाङ्के आपत्कालीन-अवरोहणं कृतवत् ब्रिटिश-नौसेनायाः एफ-३५ इति युद्धविमानं पुनः पूर्णतया सम्यक्तया कार्यकरणावस्थायां अद्य प्रस्थितवत्। जुलैमासस्य षड् दिनाङ्कतः अस्मिन् स्थले नियुक्तं यूके-अभियान्त्रिक-दलं विस्तृतम् अनुरक्षणं सुरक्षा-परीक्षां च कृतवत्, येन विमानस्य सक्रियसेवाः पुनः प्रारम्भाः भवेयुः ।

## ऋतुविज्ञानविभागः

ऋतुविज्ञानविभागेन तेलंगाना, छत्तीसगढ़, जम्मू-कश्मीर, लद्दाख, कोंकण, गोवा, तटीय-कर्णाटक-विदर्भ-क्षेत्रेषु अद्य विभिन्नस्थानेषु भीषणादपि भीषणवृष्टेः सम्भावना व्यक्तीकृता अस्ति । आगामिषु द्वि-त्रितय-दिवसेषु दिल्ली-हरियाणा-चंडीगढ़-असम-मेघालय-अरुणाचलप्रदेशानां केषुचित् क्षेत्रेषु अपि भीषणवृष्टेः सम्भावना वर्तते। उत्तराखंडे विभागेन उत्तरकाशी-देहरादून-टिहरी-जनपदानां विभिन्न-क्षेत्रेषु भीषणवृष्टेः यलो अलर्ट इति पीतवार्णिकी सञ्चेतना प्रसारिता अस्ति ।

## फ़ाइड् महिलाविश्वचषकशतरञ्जप्रतियोगिता

जार्जियानगरे फ़ाइड् महिलाविश्वचषकशतरञ्जप्रतियोगितायाः उपान्त्यचक्रे दिव्या देशमुख कोनेरुहम्पी च अद्य चीनदेशस्य प्रतिद्वन्द्विक्रीडिकयोः विरुद्धं क्रीडिष्यतः ।

।।इति वार्ताः।।